क्रं. ५७.

संस्कृत.

दशरथललिता पूजा

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

श्रीगणेशायनमः॥ अथदशरथललितानामकसंकष्टचतुर्थीपूजा देशका
(1) लौसंकीर्त्यश्रुतिस्मृति॰पुराणोक्तफलप्राप्त्यर्थं ममइहजन्मनिजन्मांतरे
च अखंडसौभाग्यावाप्त्यर्थं पुत्रपौत्रादिअभिवृद्ध्यर्थं श्रीदशांगल
लितादेवताप्रीत्यर्थंयथामीलितोपचारद्रव्येणध्यानावाहनादिषोडशो
पचारपूजांकरिष्ये॥तथाचकलशपूजनंमहागणपतिपूजनंचकरिष्ये
अथध्यानं॥ आगच्छललितेदेवि वरदे भक्तवत्सले॥दशांगललितेदे
वि अवैधव्यंप्रयच्छमे॥ध्यायामि॥ध्यायेहंपुंडरीकाक्षीललितेभक्तव
त्सले॥कृपांकुरुमहामायेपूजायंपरमेश्वरी॥ आवाहनं॰ ललितेदैत्य
नाशार्थे अवतारंकृतंत्वया॥त्राहिमांललितेदेवि आसनंप्रतिगृह्य
तां॥आसनंस॰ गंगाजलंसमानीतंसगंधाढ्यंमनोरमं॥पाद्यार्थमा
हृतंभक्त्यागृहाणपरमेश्वरी॥पाद्यंसम॰॥दशरथाभिधादेविज्ञात

(२)

द्श०ललि पुष्पदशांजलिः ॥ चंद्रेणसहितादेविगृह्णाणार्घ्यंनमोस्तुते ॥ अर्घ्यं० ॥
॥१॥ दक्षस्यदुहितादेविसौभाग्यारोग्यदायिनि ॥ आचम्यतांमयादेविललि
तेत्वाननतावच ॥ आचम० सुभगेस्तुसमुत्पन्नंदेवानामपिदुर्लभं ॥ पयो
ददामिदेवेशस्नानार्थंप्रतिगृह्यतां ॥ पयःस्नानं० ॥ चंद्रमंडलसंकाशं
दधि सर्वदेवप्रियंहिदि ॥ दध्याददामिदेवेशिस्नानार्थंप्रतिगृह्यतां ॥ दधिस्ना०
गोघृतंचमयानीतंदेवानांहविरुत्तमं ॥ स्नानार्थंचमयादत्तंप्रीत्यर्थंप्रति
गृह्यतां ॥ घृतस्नानं० ॥ सर्वौषधिसमुत्पन्नंपीयूषःसदृशंमधु ॥ मधुददा
मिदेवेशीस्नानार्थंप्रतिगृ० मधुस्नानंस० ॥ इक्षुदंडसमुद्भूतांशर्करामधु
राविभो ॥ देवदेवप्रियंस्वादुस्नानार्थंप्रतिगृह्यतां ॥ शर्करास्नानंस०
गंधोदकस्नानंस० पंचगंधोदकस्नानंस० शुद्धोदकस्नानं० आचमनी ॥ राम ॥
यंस० गंधादिपंचोपचारैःपूजयित्वा अनेनपंचामृतपूजनेनदशरथल ॥१॥

(2A)

लितादेवताप्रीयतां॥ महाभिषेकः॥महिम्नः पारंते०॥ सुरास्त्वामभिषिंचंतु
देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ग्रहास्त्वा०
देवपत्न्य राहुः केतुश्चतर्पिताः॥ गंगादिसरितश्रेष्ठाः पुण्याः पापहराः शुभाः
॥ताभ्या जलंसमानीतंस्नानार्थं प्रतिगृह्यतां॥ आचमनीयंस०॥ सर्वभूषा
धिके सौम्ये लोकलज्जानिवारणे॥ मयोपपादिते तुभ्यं वाससी प्रतिगृ
ह्यतां॥ वस्त्रंस०॥ उपवस्त्रं० यज्ञोपवीतं० आचमनीयं०॥ हरिद्रा सर्वमां
गल्या सर्वसौभाग्यदायिनि॥ सौभाग्यार्थं प्रयच्छामि देवि त्वं प्रतिगृह्य
तां॥हरिद्रांस०॥ कुंकुमं कामदं दिव्यं स्त्रीणां भालस्य भूषणं॥ सौभाग्या
र्थं प्रयच्छामि देवि त्वं प्रतिगृह्यतां॥ कुंकुमंस०॥ चंदनागरुकस्तूरिकर्पू
रादिसमन्वितं॥ हृदयानंदनं चारु चंदनं प्रतिगृह्यतां॥ दशांगललितांये०
चंदनंस०॥ अक्षताश्च सुरश्रेष्ठाः कुंकुमा०॥ अक्षतान्०॥ केतकी मालती
जाति चंपकानि वरानने॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ पु

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai — joint project

दश०ल० ॥२॥ (3)

ष्पाणिसमर्प०॥ अथांगपूजा॥ उमायैनमः॥ पादौ पू०॥ कात्यायिन्यै० गुल्फौ०
गौर्यैनमः॥ जानुनीपू०॥ ईश्वर्यैनमः॥ कटिंपू० हिमवत्यैनमः॥ नाभिंपू० पुत्रदा
यिन्यै०॥ हृदयंपू० सौभाग्यदायिन्यै० कंठंपू० भवान्यैनमः॥ नेत्रेपू० इंद्राण्यै०॥
ललाटंपू०॥ सर्वमंगलदायिन्यैनमः॥ मूर्धानंपू०॥ अथपत्रपूजा ॥ शिवायै०
पाचीपत्रंस०॥ भवान्यै० भृंगराजपत्रं० गिरिजायै० दूर्वापत्रं०॥ महिषासुरमर्दि
न्यै० अपामार्गपत्रं० विश्वामित्र्यै० धत्तूरपत्रं० लोकधारिण्यै० अर्कपत्रं० सिंह
वाहिन्यै० बिल्वपत्रं०॥ जगद्धात्रिन्यैन० तुलसीपत्रं०॥ श्रीदशांगललिता
यै० पारिजातकादिनानाविधपत्राणिस०॥ अथपुष्पपूजा ॥ भवान्यैनमः॥
जातीपुष्पं० दशांगललितायै० पारिजातकपुष्पं० गौर्यैनमः॥ शतपुष्पं०॥
कावेर्यैनमः चंपकपुष्पं० सिद्धिदायै० मल्लिकापु० हिमवत्यै० अर्कपुष्पं० लो
कधारिण्यै० पद्मपुष्पं० सिंहवाहिन्यै० धत्तूरपु० भगवत्यै० कल्हारपुष्पं० ॥राम॥
दशांगललितायैनमः॥ नानाविधपुष्पाणि॥ देवकुमरसोडूतंकालाग ॥२॥

या

(3A)

रुसमन्वितं॥ आनीतोयंमहाधूपं गृहाणपरमेश्वरि ॥ धूपंस०॥ आज्यंच
वर्ति० दीपं० मोदकापूपलडुकवटकोडुंबरादिभिः॥ सघृतंपायसेनान्नं
नैवेद्यं प्रतिगृह्यतां॥ नैवेद्यं० उत्तरापोशनं० पूगीफलंमह० तांबूलंस० च
क्षुर्दं हिरण्यगर्भेति द० इदंफलंमया० फलार्थे० बहुबीजफ० सर्वलो
कानांतिमिरस्यनिवारणं आर्तिक्यंकल्पितंभक्त्या गृहाणपरमेश्वरी म
हानीराजनदीपंस० कर्पूरदीपं० नमोदेव्यै० नमः प्रकृत्यै० मंत्रपुष्पं० या
निकानिचपापा० तानितानिविनश्यं० प्रदक्षिणां० नमस्तुभ्यंजगद्धात्रीभ
क्तानांहितकारिणि॥ जगद्भीतिविनाशिन्यैसर्वमंगलमूर्तये॥ नमस्का
रान्समर्पयामि॥ दशांगलिंगलिता देव्या व्रतसंपूर्णहेतवे॥ वाणकंद्विजव
र्यायसहिरण्यंददाम्यहं॥ इतिवायनमंत्रः॥ अथार्घ्यं॥ शंखतोयं
समादायपंचरत्नसमन्वितं॥ जानुभ्यामवनींगत्वा चंद्रायार्घ्यंनिवेद
येत्॥ क्षीरोदार्णवसंभूतलक्ष्मीबंधोनिशाकर॥ गृहाणार्घ्यंमया

...Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

दशा०ल० दत्तं रोहिण्यासहितः शशिन्॥ रोहिणीसहितचंद्रमसे नमः॥ दशांगल
॥३॥ लितायै नमः॥ प्रसनार्घ्यं सम० इदमर्घ्यं० यस्यस्मृत्येति० न्यूनं संपूर्ण
तां यातिसद्यो०॥ उत्तरपूजां विधाय विसर्जयेत्॥ आचार्याय पी
(५) ठदानं दत्वा आ० इति दशरथललितापूजा समाप्ता॥ शके १८२१
॥ इदं पुस्तकं नारायणेन लिखितं स्वार्थं परार्थं च॥ लेखक पाठ
कयोः शुभं भवतु॥ ॥आश्विन वद्य चतुर्थ्यां रवौ प्रातः॥ समाप्तं॥ शु
भं भवतु॥ ॥श्रीकृष्णार्पणं॥ ॥श्रीगणपतेर्पणमस्तु॥

विकारीनामसंवत्सरे॥ दक्षिणायने शरदृतु॥ ॥पंचम्यां सोमे राम ॥३॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com